प्रथममुद्रणस्य उपोद्घातः.

इह तावद्विष्णुगुप्तश्चाणक्य इति च विख्यातोऽर्थशास्त्रप्रवीणः ाटिल्यो नाम ब्राह्मणः क्रिस्ताब्दारम्भात्पूर्वं वत्सराणां चतुर्थे शतके न्दवंशमुन्मूल्य चन्द्रगुप्तमभिषिषेचेति विष्णुपुराणात् ज्ञायते:—

"महापद्मः; तत्पुत्राश्चैकं वर्षशतमवनीपतयो भविष्यन्ति नवैव ा नन्दान्कौटिल्यो ब्राह्मणस्समुद्धरिष्यति. तेषामभावे मौर्याश्च पृथिवीं ोक्ष्यन्ति. कौटिल्य एव चन्द्रगुप्तं राज्येऽभिषेक्ष्यति तस्यापि पुत्रो बन्दुसारो भविष्यति. तस्याप्यशोकवर्धनः" इति विष्णुपुराणे चतु- ांशे चतुर्विंशाध्याये स्पष्टमभिहितं दृश्यते.

क्रिस्ताब्दारम्भात्पूर्वं द्वासप्तत्यधिकशतद्वयपरिमिते वर्षे समारू- ढराज्यसिंहासनेन चन्द्रगुप्तपौत्रेणाङ्गीकृतबौद्धविज्ञानेनाशोकवर्धनेन भ- ारतखण्डचक्रवर्तिना ये प्रत्युप्तबौद्धधर्माश्शिलास्तम्भा न्यखानिषत तेऽ- द्यापि दरीदृश्यन्ते. अशोकपितामहश्चन्द्रगुप्तोऽपि क्रिस्ताब्दारम्भात् सप्तविंशत्यधिकशतत्रयपरिमितेषु वर्षेषु राज्यं चकारेति ग्रन्थतकादर्थ- अचारित्रादपि बाढं ज्ञायते· तस्यैतस्य चन्द्रगुप्तस्य सा

ज्यः प्राचीनाचार्यविरचितार्थशास्त्राणि संक्षिप्यैकमिदं षट्स परिमितमर्थशास्त्रं[1] प्रणिनायेत्येतस्मादेवार्थशास्त्रादिव दण्डिवि दशकुमारचरितादपि स्पष्टमाकल्यते—

"अधीष्व तावद्दण्डनीतिम्. इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैस्सङ्क्षिप्ता. सैवेयमधीत्य सम्यगनुष्ठीयमाना च सि- क कर्मक्षमेति" इति दशकुमारचरितेऽष्टम उच्छ्वासे चन्द्रगुप्तीयधर्मशा- षेदमर्थशास्त्रं कृतमिति दाण्डिना विशदीकृतम्. [3] प. 1 पेराघोऽनपराध

1 प. ६ अर्थशास्त्रम्.

50 अर्थशास्त्रम्

"सर्वशास्त्राण्यनुक्रम्य प्रयोगमुपलभ्य च।
कौटिल्येन नरेंद्रार्थे शासनस्य विधिः कृतः" ॥

इत्यध्यक्षप्रचारे दशमेऽध्याये प्रयुक्तो नरेंद्रशब्दो मौर्यचन्द्रगुप्तमेवाभिदधातीति भाति.

ये चार्थशास्त्रविषया दण्डिना "इयत ओदनस्य पाकायैतावदिन्धनम्" इत्यारभ्य, "प्राहसीत्प्रफुल्ललोचनः प्रमदाजनः[1]" इत्यन्तेन ग्रन्थजालेन प्रमदाजनहास्यास्पदतां नीतास्तेऽप्येतदर्थशास्त्रगता एवेत्यधस्ताद्दर्शितटिप्पण्यां बाढमाकलयितुं शक्यते—

(1) "इयत ओदनस्य पाकायैतावदिन्धनम्"	(1) "काष्ठपञ्चविंशतिपलं तण्डुलप्रस्थसाधनम्" अधि. II. अध्या. 19.
(2) "कृत्स्नमायव्ययजातमह्नः प्रथमेऽष्टमे भागे श्रोतव्यम्."	(2) "दिवसस्याष्टमे भागे रक्षाविधानमायव्ययौ च शृणुयात्". अधि. I, अध्या. 19.
"चत्वारिंशच्चाणक्योपदिष्यान्सहस्रथाऽऽत्मनुगयितारः."	(3) "तेषां हरणोपायाश्चत्वारिंशत्........--" अधि. II, अध्या. 8.
"द्वितीयेऽन्योन्यं विवदमा- तीये स्नातुं भोक्तुं च चतुर्थे प्रतिग्रहाय."	(4) "द्वितीये पौरजनपदानां कार्याणि पश्येत्. तृतीये स्नानभोजनं सेवेत. स्वाध्यायं च कुर्वीत. चतुर्थे हिरण्यप्रतिग्रहमध्यक्षांश्च कुर्वीत." अधि I, अध्या. 19.
भुक्तस्य च ...यावदन्धःपरि- ...न शाम्य-	(5) "अग्नेर्ज्वालाधूमनीलता ... इति विषयुक्तलिङ्गानि." अधि I, अध्या. 20.

[1] अष्टम उच्छ्वास.

यच्च नन्दिसूत्रनामके जैनग्रन्थे—

"खमए अमच्चपुत्ते चाणक्के चेव थूलवद्देय"।[1]

(क्षपकः अमात्यपुत्रः चाणक्यश्चैव स्थूलभद्रश्च) इति क्षपकामात्यपुत्रचाणक्यस्थूलभद्राणां पारिणामिकीं बुद्धिं दृष्टान्तद्वारेण विशदीकृत्य "भारहं रामायणं भीमासुरक्कं कौडिल्लियम्"[2] इति भारतरामायणभीमासुरीयककौटिलीयकानि मिथ्याशास्त्रत्वेन निर्दिष्टानि, तत्र कौटिलीयशब्देनैतदेव चाणक्यकृतमर्थशास्त्रमभिप्रेतमिति बाढं सुवचम्.

यच्च यशोधरमहाराजसमकालेन सोमदेवसूरिणा नीतिवाक्यामृतं नाम नीतिशास्त्रं विरचितं तदपि कामन्दकीयमिव कौटिलीयार्थशास्त्रादेव सङ्क्षिप्य सङ्गृहीतमिति तद्ग्रन्थपदवाक्यशैलीपरीक्षायां निस्संशयं ज्ञायते.

मल्लिनाथसूरिणाऽपि रघुवंशे सप्तदशसर्गे एकोनपञ्चाशश्लोकव्याख्याने षट्सप्ततितमश्लोकव्याख्याने च, तथाऽष्टादशसर्गे पञ्चाशश्लोकव्याख्याने चार्थशास्त्रीयपारिभाषिकशब्दाभिधेयप्रमाणतया कौटिलीयार्थशास्त्रपङ्क्तिरुदाहृता दृश्यते.

अतश्च क्रिस्ताब्दारम्भादा च क्रिस्ताब्दानां पञ्चदशशतकादर्थशास्त्रमिदं विद्वद्भिः कृतपरिचयं प्रथितमासीदिति स्पष्टम्.

यच्चैतदर्थशास्त्रस्य याज्ञवल्क्यस्मृतिव्यवहारकाण्डस्य चेत्रवचस्यसाधारणमानुपूर्वीसाम्यं तत्र तत्राधस्तनटिप्पण्यामत्र ग्रन्थेटिल्येन र्शितं तत्रेयमाशङ्का प्रसरति—किमिदमर्थशास्त्रं याज्ञवल्क्यस्ल्क्यस्मृकालिकमथवा सैव स्मृतिरेतदर्थशास्त्रोत्तरकालिका, आ चाणक्योद्ग्रन्थद्वयमप्युभयसाधारणग्रन्थान्तरानुरोधि? इति. ; कालेऽर्थ-

तत्र "युक्तकर्मणि चायुक्तस्य"[3] इति राज्यकारीति च सि-

.वल्क्यधर्मशा-

[1] पृ. 133 नान्दसूत्रन्. [2] पृ. 391 नान्दिसूत्रम्. [3] पृ. 1(ऽपराधोऽनपराध

150 अर्थशास्त्रम्

अपि च "किं वा तेषां साम्प्रतं येषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणं, अभिचारक्रियाक्रूरैकप्रकृतयः पुरोधसो गुरवः, पराभिसन्धानपरा मन्त्रिणः उपदेष्टारः, नरपतिसहस्रोज्झितायां लक्ष्म्यामासक्तिः, मारणात्मकेषु शास्त्रेष्वभियोगः, सहजप्रेमार्द्रहृदयानुरक्ता भ्रातर उच्छेद्याः" [1] इति कादम्बर्यां बाणेनापि कौटिलीयार्थशास्त्रे कण्टकशोधनाद्यधिकरणेषु प्रतिपादिता दूष्यवधाद्युपायास्स्पष्टं निन्दिता दृश्यन्ते. पुरातनप्रसिद्धश्रीहर्षादिराजास्थाने माननीयपदवीमारूढैः बाणादिभिः विद्वद्भिः कृतैषैव निन्दाऽर्थशास्त्रोपदेशाधिकाराय कारणमभूदिति स्पष्टमवगम्यते. अतश्च यान्यर्थशास्त्राणि "मानवाः," "औशनसाः," "बार्हस्पत्याः," "विशालाक्षः," "पिशुनः," "वातव्याधिः" इति कौटिल्येन तत्तद्ग्रन्थकृन्नाम्नाऽनूदितानि तान्युत्तरकालिकविद्वद्भिर्धिक्कृतानि खिलान्यासन्निति बाढं सुवचम्.

किं च—क्रिस्ताब्दारम्भात्पूर्वमुत्तरं वा भरतखण्डमपहाय बलिद्वीपमाश्रितवद्भिरार्यजनैः यः कामन्दकीयनीतिसारो नाम राजनीतिग्रन्थः सङ्गृहीतोऽद्यापि बलिद्वीपे दृश्यत इति श्रूयते तस्मिन्नीतिसारग्रन्थादौ—

"नीतिशास्त्रामृतं धीमानर्थशास्त्रमहोदधेः ।
समुद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे" ॥

इति वदता कामन्दकेनापि कौटिलीयार्थशास्त्रमेतदेव बाढं परिचितमासीदिति न कोऽपि सन्देहः.

प्रतिच—"ततो धर्मशास्त्राणि मन्वादीन्यर्थशास्त्राणि चाणक्यादीनि कामशास्त्राणि वात्स्यायनादीनि" इति पञ्चतन्त्रे कथामुखे वदन् पञ्चतन्त्रकर्तापि कौटिलीयार्थशास्त्रे कृतपरिचयोऽभूदिति स्पष्टमवगम्यते

भुक्र [1] 19. Kadambari, Bombay Education Society's Press.

राज्याधिकृतकार्यकरणे दण्डविधानपरमर्थशास्त्रवाक्यं, "अयोग्यो योग्यकर्मकृत्" इत्ययोग्यस्य शूद्रादेर्योग्यब्राह्मणादिकर्मकरणे दण्डः इत्यर्थान्तरे प्रयुञ्जानस्स्मृतिकर्ता प्रायेण चाणक्योत्तरकालिक एव स्यादिति भाति. किं च "शापथवाक्याभियोगमनिसृष्टं कुर्वतः"[1] इति राजाननुज्ञातस्य प्रमाणपूर्वकं चोरादिवाक्यकर्मपरीक्षायां दण्डविधायकमर्थशास्त्रवाक्यं, "अयुक्तं शपथं कुर्वन्" इत्यनुचितशपथकरणे दण्डविधानपरत्वेन स्मृतौ व्यत्यस्तं दृश्यते. तथा "पाणिपाददन्तभङ्गे कर्णनासाच्छेदने प्राणविदारणे चान्यत्र दुष्टव्रणेभ्यः"[2] इति दुष्टव्रणोद्भेदनिमित्तान्यनिमित्तकरादिच्छेदने प्राणविदारणे च दण्डविधायकमर्थशास्त्रवाक्यं "करपाददतो भङ्गे छेदने कर्णनासयोः। मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा।" इति व्रणोद्भेदेऽपि दण्डविधायकपरत्वेन स्मृतौ व्यत्यस्तं दृश्यते. एते चान्येऽपि व्यत्यस्तविषयाः यथावदर्थज्ञानमूलका वा स्वोत्प्रेक्षामूलका वेति याज्ञवल्क्यत्वेनाधुनोपलभ्यमानास्स्मृतेरुत्तरकालिकत्वं स्पष्टयन्ति.

अथापि चाणक्यात्पूर्वं न धर्मशास्त्राण्यासन्निति वक्तुं न शक्यते। यतः "शास्त्रं विप्रतिपद्येत धर्मन्यायेन केनचित्। न्यायस्तत्र प्रमाणं स्यात्तत्र पाठो हि नश्यति[3] ॥" इति न्यायविरुद्धस्य धर्मशास्त्रवचनस्य स्वमूलश्रुतिपाठाज्ञानमूलकत्वेन त्याज्यतां वदता कौटिल्येन स्वकालेऽपि धर्मशास्त्रसत्ता स्पष्टमभ्युपगता दृश्यते. याज्ञवल्क्यस्मृतावपि "अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः" इति चाणक्योक्तिविपरीतमेवोक्तं दृश्यते. अतश्च याज्ञवल्क्यस्मृतिकर्तुः कालेऽर्थशास्त्रमासीदिति चाणक्यस्य काले च धर्मशास्त्रमासीदिति च सिद्धम्. परं तु चाणक्यस्य कालेऽधुनोपलभ्यमानं याज्ञवल्क्यधर्मशास्त्रं नासीदिति भाति. न ह्येककाल एव व्रणोद्भेदोऽपराधोऽनपराध

---

[1] प. 199 अर्थशास्त्रम्. [2] प. 195 अर्थशास्त्रम्. [3] प. 150 अर्थशास्त्रम्

इति च गृह्यते. नाप्येककाल एव युक्तायुक्तशब्दौ राज्याधिकृतानधिकृतपरत्वेन योग्यायोग्यपरत्वेन च प्रयुज्येते. अतश्च चाणक्यकालिकं धर्मशास्त्रमधुनातनायाज्ञवल्क्यधर्मशास्त्रादन्यदेवासीदिति भाति. एवमेव ये पुनर्मानवबार्हस्पत्यौशनसा भिन्नाभिप्रायास्तत्रतत्र कौटिल्येन परामृष्टाः न तेऽधुनोपलभ्यमानेषु तत्तद्धर्मशास्त्रेषु दृश्यन्त इति कौटिल्यपरामृष्टानि तानि शास्त्राण्यन्यान्येवेति बाढं सुवचम्.

यत्तु न कोऽपि ग्रन्थकर्ता स्वनामनिर्देशपूर्वकं स्वाभिप्रायं व्यनक्तीत्यधनातनसम्प्रदायमुररीकृत्य केचित्पाश्चात्यविद्वांसः "इति बादरायणः", "इत्याह बोधायनः", "नेति कौटिल्यः", इति निर्दिष्टबादरायणबोधायनादिनामानो ग्रन्था न बादरायणबोधायनादिकृता इति मन्यन्ते तत्प्राचीनार्यविद्वत्संप्रदायानवबोधमूलकमेव । पराभिप्रायनिराकरणपूर्वकं स्वाभिप्रायप्रकटनं हि ग्रन्थकृतामस्मच्छब्दप्रयोगेण वा स्वनामनिर्देशेन वा कर्तुं शक्यते अहन्ताबोधकास्मच्छब्दप्रयोगोऽहन्तात्यागे बद्धमानसेभ्यो भरतखण्डीयविद्वद्भ्यो नाद्यापि रोचते, अतश्च स्वनामनिर्देशेनैव स्वाभिप्रायप्रकटनमनुल्लङ्घनीयमासीत्. तथा च "इति कौटिल्यः" इत्यनेकशोऽत्रार्थशास्त्रे प्रयोगे दृश्यमानेऽपि नेदमर्थशास्त्रं कौटिल्यकृतमपि तु तच्छिष्यकोटौ केनचिद्विरचितमिति न युक्तं वक्तुम् । अतश्च—

"येन शास्त्रं च शस्त्रं च नन्दराजगता च भूः ।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्"[1] ॥

इतीदंशब्दप्रयोगोऽस्य ग्रन्थस्य चाणक्यकृतत्व एव युज्यते.

किंच—मन्वादिस्मृतीनां भिन्नकर्तृतायां न केवलम् मन्वादिबोधितत्वेन चाणक्येन परामृष्टानामभिप्रायाणामधुनोपलभ्यमानासु तासु स्मृतिष्वभाव एव कारणमपितु "एतद्धोऽयं भृगुश्शास्त्रं श्रावयि

---

[1] अधि. XV, अध्या I.

ष्यत्यशेषतः" इति मानवीयं वचनं, याज्ञवल्क्यस्मृतेस्तु "याज्ञवल्क्य-शिष्यः कश्चन प्रश्नोत्तररूपं याज्ञवल्क्यप्रणीतं धर्मशास्त्रं सङ्क्षिप्य कथयामास यथा मनुप्रोक्तं भृगुः" इति विज्ञानेश्वरवचनं च कारणं दरीदृश्यते. कौटिलीयार्थशास्त्रविषये तु न तादृशं कारणं दृश्यत इतीदमर्थशास्त्रं कौटिल्यकृतमेवेति सुवचम्.

अर्थशास्त्रापेक्षया धर्मशास्त्रस्य प्राबल्याभ्युपगमे च कारणानि न दुरूहाणि. गूढचारमुखाद्दूष्यज्ञानं, दूष्यवधोपायाः, परस्परद्वेषनिमित्तं, विवाहबन्धमोचनं, प्रोषितभर्तृकाणां मृतभर्तृकाणां च स्त्रीणां पुनर्विवाहः, ऋतुमत्यास्स्वयंवरणं, दुर्भिक्षोपद्रवनिवारणाय धनिकानां वमनं कर्शनं वा, औपनिषदिकाधिकरणोक्ताः काणकुष्ठादियोगाः, इत्यादयोऽर्थशास्त्रोपदिष्टाः निखिलजनद्विष्टा उपायाः धर्मशास्त्रकारैर्दूरीकृता इति भाति.

यथा ग्रीकजनाः भरतखण्डीयराज्यनीतिमवर्णयन् तथैवात्रार्थशास्त्रे प्रतिपादिता राजनीतिरिति 'विन्सेंट् स्मित् ' नाम्ना पाश्चात्यविदुषा स्वीयभरतखण्डचारित्रे समुल्लिखितं दृश्यते. अतश्चास्यार्थशास्त्रस्य प्राचीनता बाढं परिदृश्यते.

कोशान्तरानुपलम्भात्तालपत्रेषु ग्रन्थाक्षरैर्लिखितामेकामेव मूलमातृकां, द्वितीयाधिकरणाष्टमाध्यायादारभ्य अधिकरणसमाप्तिपर्यन्तमुपलब्धां भट्टस्वामिकृतां प्रतिपदपञ्चिकानाम्नीं व्याख्यां च परिक्ष्यैतद्ग्रन्थमुद्रणं साधितम्.

MYSORE,
5th November 1908.

R. SHAMA SASTRY.

द्वितीयमुद्रणस्य उपोद्घातः

इह खलु 1909 तमे क्रिस्ताब्दे प्रकाशितादर्थशास्त्रस्य प्रथममुद्रणादा चाद्यतने 1919 तमे क्रिस्ताब्दे प्रकाश्यमानाद्द्वितीयमुद्रणाद्गतेषु दशसु वत्सरेषु नीतिशास्त्रमिदमहमहमिकयाऽधीयानेषु पाश्चात्येषु विद्वत्सु संस्कृतविद्याकोविद कीत्नामा विद्वान् 'अर्थशास्त्रप्रणेता विष्णुगुप्तः कामशास्त्रप्रणेतुर्वात्स्यायनात्प्रायेण नान्य इति संभावयामास. संभावनायाश्चास्या हेमचन्द्ररचिता अभिधानचिन्तामणिर्यादवप्रकाशप्रणीता वैजयन्ती च मूलमित्यवगम्यते. तत्र हि

वात्स्यायनो मल्लनागः कौटिल्यश्चणकात्मजः ।
द्रामिलः पक्षिलस्स्वामी विष्णुगुप्तोऽङ्गुलश्च सः ॥

इति हेमचन्द्रेण,

वात्स्यायनस्तु कौटिल्यो विष्णुगुप्तो वराणकः ।
द्रामिलः पक्षिलस्स्वामी मल्लनागोऽङ्गुलोऽपि च ॥

इति यादवप्रकाशेन च कौटिल्यस्य वात्स्यायन इत्यपरं नामधेयं दत्तं दृश्यते.

भोजराजरचितायां नाममालिकायां तु वात्स्यायनशब्दस्थले कात्यायनशब्दः पठितो दृश्यते. यथा—

कात्यायनो वररुचिर्मेधाजिच्च पुनर्वसुः ।
कात्यायनस्तु कौटिल्यो विष्णुगुप्तो वराणकः ।
द्राविलः पक्षिलस्स्वामी मल्लनागोऽङ्गुलोऽपि च ॥ इति ।

किमत्र कात्यायनशब्दो भोजेनैव पठितः अथवा लेखकेन वात्स्यायनः कात्यायनः इति लिखितेऽप्यन्यत्र वात्स्यायनशब्दं दृष्ट्वा प्रमाणान्तर

मवलम्ब्य वा भोजोत्तरकालिकाभ्यां हेमचन्द्रयादवप्रकाशाभ्यां कौटिल्यो वात्स्यायनापरनामधेयः कृतो वा ? इति बहवः प्रश्नास्स्वयमेव प्रसरन्ति। यदि कात्यायनशब्द एव भोजानुमतः पाठस्स्यात्तदा वात्स्यायनशब्द-पाठः प्रमाद एवेति कौटिल्यस्य वात्स्यायनाभिन्नता दूरापास्ता भवेत्। यदि तु वात्स्यायनशब्दपाठ एवानुमतस्स्यात्, तदा नन्द-समकालिकः कौटिल्य इति विष्ण्वादिपुराणवाक्यानि दण्डिवाक्यं च दत्तजलाञ्जलीनि स्युः। तथाहि—

नन्दान् हत्वा कौटिल्यो नन्दराज्ये चन्द्रगुप्तमभिषिषेचेति विष्ण्वादिपुराणवाक्येभ्यः मौर्यचन्द्रगुप्तार्थं चाणक्योऽर्थशास्त्रं विरचयामासेति दण्डिवाक्याच्च कौटिल्यः क्रिस्तात्प्रागब्दानां चतुर्थे शतकेऽजीवदिति ज्ञायते। "कर्तर्या कुन्तलश्शातकर्णिश्शातवाहनो महादेवीं मलयवतीं जघान" इति कामसूत्रे (II. 7) अभिदधानो वात्स्यायनस्तु क्रिस्ताब्दानां 137 तमाद्वत्सरादा च 209 तमाद्वत्सराद्भरतखण्डस्य पश्चिमप्रान्तेषु कृतराज्यानुशासनानां शातवाहनानां वंश्येन शातकर्णिना समकालिको वा आहोस्विचदुत्तरकालिको वाऽभवदिति बाढं ज्ञायते। तदित्थं पुराणादिप्रमाणबलेन कामसूत्रन्यायसूत्रभाष्ययोः प्रणेतुः वात्स्यायनाद्बाढं प्राचीनः कौटिल्यः कथं वा स्वोत्तरकालिकात्तस्माद्-भिन्नस्स्यात् ?

अपि च स्वीये ग्रन्थेऽनूद्यमानस्य स्वीयग्रन्थान्तरस्य स्वीयता-प्रदर्शनरूपं ग्रन्थकृतां सम्प्रदायमुररीकृत्य न्यायसूत्रभाष्येऽर्थशास्त्रवाक्यान्यनुवदन्नपि वात्स्यायनो न कुत्राप्यर्थशास्त्रस्य स्वीयतां प्रदर्शयामास। तथाहि—

(1) 'प्रदीपस्सर्वविद्यानामुपायस्सर्वकर्मणाम्।
आश्रयस्सर्वधर्माणां विद्योद्देशे प्रकीर्तिता॥'

इति प्रथमाध्याये प्रथमाह्निके प्रथमसूत्रस्य भाष्ये,

(2) परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः ।

इति प्रथमाध्याये प्रथमाह्निके चतुर्थसूत्रभाष्ये,

(3) पदसमूहो वाक्यमर्थपरिसमाप्तौ ।

इति प्रथमाध्याये द्वितीयाह्निके ५५ तमसूत्रभाष्ये च अर्थशास्त्रवाक्यान्यनूदितानि वर्तन्ते। एषु अनुवादेषु 'शश्वदान्वीक्षिकी मता'' इति अर्थशास्त्रस्य प्रथमाधिकरणे द्वितीयाध्याये पठ्यमानं चतुर्थं पादं प्रहाय "विद्योद्देशे प्रकीर्तिता" इति विद्योद्देशनामकमनूदितप्रकरणं प्रदर्शयन् वात्स्यायनः प्रकीर्तनकर्तारं निगूहयामास। तथैव द्वितीयानुवादे तन्त्रयुक्तिनामकं पञ्चदशमधिकरणमनुवादस्थलमाभिदधानोऽपि तत्रापि स्वीयतां परकीयतां वा सन्दिग्धां चकार. तृतीयानुवादे त्वनुवादप्रदेशमपि (अर्थ. II. 10) न द्योतयामास. यद्यर्थशास्त्रं स्वीयमेव स्यात्तदुद्देशं गूहनाश्रमं परिहाय तस्य ग्रन्थस्यापि स्वीयतां स प्रकाशयेदेव.

किंच "यथा दाण्डक्यो नाम भोजः कामाद्ब्राह्मणकन्यामभिमन्यमानस्सबन्धुराष्ट्रो विननाश ।...... रावणश्च सीतामपरे चान्ये च बहवो दृश्यन्ते कामवशगा विनष्टा इत्यर्थचिन्तकाः" इति कामसूत्रे (I. 2) अर्थशास्त्रस्य प्रथमाधिकरणीयषष्ठाध्यायाद्वाक्यान्यनुवदन्वात्स्यायनः "अर्थचिन्तकाः" इति गौरवप्रदर्शकं बहुवचनान्तं पदं प्रयुज्य अर्थशास्त्रप्रणेतुरस्वान्यतां स्पष्टीचकारेति सुवचम्.

अपि चार्थशास्त्रे प्रयुक्तानि पारिभाषिकपदानि प्रयुज्य कामसूत्रं रचयन्वात्स्यायनस्तस्य ग्रन्थस्यार्थशास्त्रोत्तरकालकृतां बाढं प्रकटयमास। तथाहि :—

कामसूत्रमिदं प्रणीतम् ।	इदमर्थशास्त्रं कृतम् ।
तस्यायं प्रकरणाधिकरण-	तस्यायं प्रकरणधिकरण-

1. समुद्देशः ।.......विद्यासमुद्देशः औपनिषदिकम् । I. 1.	समुद्देशः । विद्यासमुद्देशः ....औपनिषदिकम् । I. 1.
2. पितृपैतामहं वश्यं इति मित्रसंपत् । I. 5.	पितृपैतामहं वश्यं इति मित्रसंपत् VI. 1.
3. कामोपधाशुद्धान्रक्षिणोऽन्तःपुरे स्थापयेदित्याचार्याः V. 6.	कामोपधाशुद्धान् बाह्याभ्यन्तरविहाररक्षासु । I. 10.
4. इतस्ततश्च स्वयमेवापसृत्योपजपति चेदुभयोर्गुणानपेक्षी चलबुधिरसन्धेयः VI. 4.	स्वदोषेण गतागतो गुणमुभयाः परित्यज्याकारणाद्गतागतश्चलबुद्धिरसन्धेयः । VII. 6.
5. अर्थो धर्मः काम इत्यर्थत्रिवर्गः । अनर्थोऽधर्मो द्वेष इत्यनर्थत्रिवर्गः VI. 6.	अर्थो धर्मः काम इत्यर्थत्रिवर्गः । अनर्थोऽधर्मश्शोक इत्यनर्थत्रिवर्गः । IX. 7.
6. अर्थोऽर्थानुबन्धः अर्थो निरनुबन्धः अर्थोऽनर्थानुबन्धः अनर्थोऽर्थानुबन्धः अनर्थो निरनुबन्धः अनर्थोऽनर्थानुबन्धः अर्थोऽनर्थ इति संशयः धर्मोऽधर्म इति संशयः कामो द्वेष इति संशयः VI.6.	अर्थोऽर्थानुबन्धः अर्थो निरनुबन्धः अर्थोऽनर्थानुबन्धः अनर्थोऽर्थानुबन्धः अनर्थो निरनुबन्धः अनर्थोऽनर्थानुबन्धः अर्थोऽनर्थ इति संशयः धर्मोऽधर्म इति संशयः कामश्शोक इति संशयत्रिवर्गः IX. 7,

गवाध्यक्ष— सूत्राध्यक्ष— पण्याध्यक्ष— आयुक्ताद्यर्थशास्त्रपारिभाषिकपदानि च तत्र तत्रोपयुक्तानि दृश्यन्ते ।

(2) परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः।

इति प्रथमाध्याये प्रथमाह्निके चतुर्थसूत्रभाष्ये,

(3) पदसमूहो वाक्यमर्थपरिसमाप्तौ।

इति प्रथमाध्याये द्वितीयाह्निके ५५ तमसूत्रभाष्ये च अर्थशास्त्रवाक्यान्यनूदितानि वर्तन्ते। एषु अनुवादेषु "शश्वदान्वीक्षिकी मता" इति अर्थशास्त्रस्य प्रथमाधिकरणे द्वितीयाध्याये पठ्यमानं चतुर्थं पादं प्रहाय "विद्योद्देशे प्रकीर्तिता" इति विद्योद्देशनामकमनूदितप्रकरणं प्रदर्शयन् वात्स्यायनः प्रकीर्तनकर्तारं निगूहयामास। तथैव द्वितीयानुवादे तन्त्रयुक्तिनामकं पञ्चदशमधिकरणमनुवादस्थलमाभिदधानोऽपि तत्रापि स्वीयतां परकीयतां वा सन्दिग्धां चकार. तृतीयानुवादे त्वनुवादप्रदेशमपि (अर्थ. II. 10) न द्योतयामास. यद्यर्थशास्त्रं स्वीयमेव स्यात्तद्देशं गूहनाश्रमं परिहाय तस्य ग्रन्थस्यापि स्वीयतां स प्रकाशयेदेव.

किंच "यथा दाण्डक्यो नाम भोजः कामाद्ब्राह्मणकन्यामभिमन्यमानस्सबन्धुराष्ट्रो विननाश।...... रावणश्च सीतामपरे चान्ये च बहवो दृश्यन्ते कामवशगा विनष्टा इत्यर्थचिन्तकाः" इति कामसूत्रे (I. 2) अर्थशास्त्रस्य प्रथमाधिकरणीयषष्ठाध्यायाद्वाक्यान्यनुवदन्वात्स्यायनः "अर्थचिन्तकाः" इति गौरवप्रदर्शकं बहुवचनान्त पदं प्रयुज्य अर्थशास्त्रप्रणेतुस्स्वान्यतां स्पष्टीचकारेति सुवचम्.

अपि चार्थशास्त्रे प्रयुक्तानि पारिभाषिकपदानि प्रयुज्य कामसूत्रं रचयन्वात्स्यायनस्तस्य ग्रन्थस्यार्थशास्त्रोत्तरकालेकृतां बाढं प्रकटयमास। तथाहि :—

कामसूत्रमिदं प्रणीतम्।	इदमर्थशास्त्रं कृतम्।
तस्यायं प्रकरणाधिकरण-	तस्यायं प्रकरणाधिकरण-

1. समुद्देशः।.......विद्यासमुद्देशः औपनिषदिकम्। I. 1.	समुद्देशः। विद्यासमुद्देशः ....औपनिषदिकम्। I. 1.
2. पितृपैतामहं वश्यं इति मित्रसंपत्। I. 5.	पितृपैतामहं वश्यं इति मित्रसंपत् VI. 1.
3. कामोपधाशुद्धान्रक्षिणोऽन्तःपुरे स्थापयेदित्याचार्याः V. 6.	कामोपधाशुद्धान् बाह्याभ्यन्तरविहाररक्षासु। I. 10.
4. इतस्ततश्च स्वयमेवापसृत्योपजपति चेदुभयोर्गुणानपेक्षी चलबुधिरसन्धेयः VI. 4.	स्वदोषेण गतागतो गुणमुभयोः परित्यज्याकारणाद्गतागतश्चलबुद्धिरसन्धेयः। VII. 6.
5. अर्थो धर्मः कामः इत्यर्थत्रिवर्गः। अनर्थोऽधर्मो द्वेष इत्यनर्थत्रिवर्गः VI. 6.	अर्थो धर्मः काम इत्यर्थत्रिवर्गः। अनर्थोऽधर्मश्शोक इत्यनर्थत्रिवर्गः। IX. 7.
6. अर्थोऽर्थानुबन्धः	अर्थोऽर्थानुबन्धः
अर्थो निरनुबन्धः	अर्थो निरनुबन्धः
अर्थोऽनर्थानुबन्धः	अर्थोऽनर्थानुबन्धः
अनर्थोऽर्थानुबन्धः	अनर्थोऽर्थानुबन्धः
अनर्थो निरनुबन्धः	अनर्थो निरनुबन्धः
अनर्थोऽनर्थानुबन्धः	अनर्थोऽनर्थानुबन्धः
अर्थोऽनर्थ इति संशयः	अर्थोऽनर्थ इति संशयः
धर्मोऽधर्म इति संशयः	धर्मोऽधर्म इति संशयः
कामो द्वेष इति संशयः VI. 6.	कामश्शोक इति संशयत्रिवर्गः IX. 7,

गवाध्यक्ष— सूत्राध्यक्ष— पण्याध्यक्ष— आयुक्ताद्यर्थशास्त्रपारिभाषिकपदानि च तत्र तत्रोपयुक्तानि दृश्यन्ते।

पाणिनिप्रयुक्तानि व्याकरणपारिभाषिकपदानि न्यायसूत्रभाष्ये प्रयुञ्जानो वात्स्यायनोऽज्ञातपाणिनेः कौटिल्यादुत्तरकालिक इत्यपरं कारणं चात्र दरीदृश्यते । तथाहि—

1. वृक्षस्तिष्ठतीति स्वास्थितौ स्वातन्त्र्यात् कर्ता ।	स्वतन्त्रः कर्ता	I. 4, 54.
2. वृक्षं पश्यतीति दर्शनेनाप्तुमिष्यमाणत्वात् कर्म ।	ईप्सिततमं कर्म	I. 4, 49.
3. वृक्षेण चन्द्रमसं ज्ञापयतीति ज्ञापकस्य साधकतमत्वात् करणम्	साधकतमं करणं	I. 4, 42.
4. वृक्षायोदकमासिञ्चतीति आसिच्यमानेनोदकेन वृक्षमभिप्रैतीति सम्प्रदानम् ।	कर्मणा यमभिप्रैति स सम्प्रदानम्	I. 4, 45.
5. वृक्षे वयांसि सन्तीत्याधारोऽधिकरणम् । I. 2, 16.	आधारोऽधिकरणम्	I. 4, 45.

किंच अस्तेर्भूः, (I. 4, 52) ब्रुवो वचिः (I. 4, 53) इत्यादिसूत्राणि च न्यायसूत्रभाष्ये (II. 2, 41) अनूदितानि वर्तन्ते । कौटिल्येन अपरामृष्टा मन्वन्तरयुगान्तरविषयाः कामसूत्रे (II. 1, 67) निर्दिष्टाः वात्स्यायनस्योत्तरकालिकतां स्पष्टयन्तीति पाश्चात्यविदुषां राद्धान्तः ।

अन्यच्चेदं कौटिल्यस्य वात्स्यायनान्यत्वनिर्धारकं कारणं दरीदृश्यते । स्वीये कामसूत्रव्याख्याने (I. 2) "वात्स्यायन इति स्वगोत्रनिमित्ता समाख्या । मल्लनाग इति सांस्कारिकी" इति कामसूत्रप्रणेतुर्नामभेदनिर्वचनं कुर्वन् यशोधरः, सति वात्स्यायनस्य कौटिल्यादिनामान्तरे प्रसङ्गसङ्गत्या तत्सूचनमपि नैवोज्झ्यात् । कामसूत्रप्रणेतुर्वात्स्यायनो मल्लनाग इति यन्नामद्वयं प्रसिद्धं निर्दिष्टं, न

केवलं व्याख्यातृकृतं तन्नामभेदनिर्वचनमेका प्रसक्तिरपि तु अर्थशास्त्राद्वाक्यानामनुवादः कौटिलीयादिम्लेच्छितविकल्पानां विवरणं चापरे द्वे प्रसक्ती आस्ताम्. ग्रन्थनामनिर्देशं विनैव केवलं "तथा चोक्तम्" इत्यर्थशास्त्रात्कामसूत्रव्याख्याने यशोधरेणानूदितानि वाक्यानि चेमानि.—

(1) "संवरणमात्रं त्रयी लोकयात्राविदः।"
कामसूत्रव्याख्या I. 2, पत्र. 21. अर्थशास्त्रम्. I. 2.

(2) "दैवं मानुषं हि कर्म लोकं पालयति।"
काम. I. 2, प. 23. अर्थ. VI. 2.

(3) "मेषशृङ्गी क्वाथाभिषुतो गुडप्रतीवापः पिप्पलीमरिचसम्भ स्त्रिफलायुक्तो मद्यो मैरेयः"।
काम I. 4, प. 54. अर्थ. II. 25.

(4) "तत्र पूर्वे धर्म्याश्चत्वारः।"
काम. III. 3. प. 208. अर्थ. III. 2.

(5) "न शोधनमशुद्धस्य विशेषेणाम्भसश्चरेत्। कदा चिद्विप्रदुष्टस्य नाधिगम्येत भेषजम्॥"
काम. V. 6. प. 303. अर्थ. I. 10.

(6) "शौर्यममर्षता शीघ्रता दाक्ष्यं चोत्साहगुणाः।"
काम. VI. 1. प. 309. अर्थ. VI. 1.

"तथा च कौटिल्येनार्थशास्त्रे उक्तम्" इति वा अथवा "तथा च वात्स्यायनेनैव स्वीयेऽर्थशास्त्रे उक्तम्" इति वा विशिष्य निगमनं विहाय केवलं "तथाचोक्तम्" इति सामान्यतः परोक्तिमिव परामृशन्यशोधरस्तान्येतानि वाक्यान्यन्ववदत्. एवमेव "यत्साधुशब्दोपनिबद्धमप्यक्षरविपर्यासादस्पष्टार्थं तन्म्लेच्छितं गूढवस्तुमन्त्रार्थम्। तस्य विकल्पा बहवः पूर्वाचार्योक्ताः। तद्यथा—

"कौटिलीयं यदि क्षान्तैः स्वरयोर्ह्रस्वदीर्घयोः । बिन्दूष्मणोर्विपर्यासाद्दुर्बोधमिति संज्ञितम्" (I. 3. प. 39.) इति कौटिलीयस्य म्लेच्छितविकल्पस्य पूर्वाचार्योक्तत्वं वदता यशोधरेण कौटिल्यो वात्स्यायनादन्यः पूर्वाचार्य इति वादं प्रकटितं दृश्यते.

अपि च—

आयुर्दायं विष्णुगुप्तो ऽपिचैवं
देवस्वामी सिद्धसेनश्च चक्रे ।

इति बृहज्जातकस्य सप्तमाध्यायस्थसप्तमश्लोकस्य व्याख्यायां "किं तु विष्णुगुप्तेनापि चाणक्यापरनाम्ना एवमुक्तम् " इति,

"न कुम्भलग्नं शुभमाह सत्यः
न भागभेदाद्यवना वदन्ति ।
कस्यांशभेदो न तथाऽस्ति राशेः
अतिप्रसङ्गास्त्विति विष्णुगुप्तः" ॥

इति बृहज्जातकस्य एकविंशाध्यायस्थतृतीयश्लोकव्याख्यायां "अत्र विष्णुगुप्तचाणक्यावाहतुः—कस्यांशेति" इति च वदता भट्टोत्पलेन चाणक्यापरनामा विष्णुगुप्त एकः चाणक्यापरनामविरहितोविष्णुगुप्तोऽपर आसीदिति सूचितं दृश्यते. एतौ च विष्णुगुप्तचाणक्यौ राश्यंशसंज्ञापरिष्कृतज्योतिश्शास्त्रवेत्तारौ राश्यंशभेदापरिष्कृतज्योतिर्विदो विष्णुगुप्तचाणक्यापरनामद्वयादर्थशास्त्रकृतः कौटिल्यादन्यावास्तामिति द्वितीयाधिकरणस्थकालमानाध्यायात् (II. 20.) निर्णेतुं शक्यते । तत्र हि राश्यंशभेदोपजीव्यं सपादपञ्चषष्ट्यधिकत्रिशतदिनमितं सौरं संवत्सरमपहाय आदित्यसंवत्सरं षट्षष्ट्यधिकत्रिशतादिवसपरिमितं प्रकल्पितमङ्गीकृत्यैव अधिमासगणना कृता दृश्यते । अतश्च राश्यंशभेदपरिष्कृतसौरसंवत्सरादिविषयास्तदानीमर्थशास्त्रप्रणेत्रा कौटिल्येन न ज्ञाता आसन्निति स्पष्टमेव गम्यते । तथा च,

"उक्तं चाचार्यविष्णुगुप्तेन।

तथाऽऽह—

अप्यर्णवस्य पुरुषः प्रतरन् कदाचित्
आसादयेदनिलयोगवशेन पारम्।
न त्वस्य कालपुरुषाख्यमहार्णवस्य
गच्छेत्कदाचिदनृषिर्मनसाऽपि पारम्"

इति बृहत्संहितायां (II. 4) वराहमिहिरेण निर्दिष्टो विष्णुगुप्तोऽर्थशास्त्रप्रणेतुर्विष्णुगुप्तादन्य एवेति निर्धार्यते। तदित्थं वात्स्यायनस्य विष्णुगुप्तादिनामभिः प्रसिद्धौ सत्यामपि न तस्यार्थशास्त्रप्रणेतृत्वप्रसक्तिस्संभवतीत्यनवद्यम्.

"खम ए अमच्चपुत्ते चाणिक्क चेव्व थूलबद्दय।
भारहं रामायणं भीमासुरक्कं कोडिल्लियम्"

इति वदता नन्दिसूत्रकृता कौटिलीयार्थशास्त्रं ज्ञातपूर्वमासीदिति प्रथममुद्रणोपोद्धाते सूचितम्। राजकोपपात्रस्य मन्त्रिणः कर्तव्यं बोधयितुं कौटिल्येन पञ्चमाधिकरणे पञ्चमाध्याये परमतानुसारेण प्रयुक्तानां क्रौञ्चापसव्यगमनदीर्घतृणशीतशाट्यादिपदानां व्याख्यारूपाः काश्चन पुरातन्यो गाथा दृश्यन्ते[1], अर्थशास्त्रबुभुत्सुभिस्सकथास्ता गाथा अवश्यं ज्ञातव्या एवेति ता अत्र समुद्ध्रियन्ते.—

उप्पात्तिया वेणयिया कम्मया पारिणामिया।
बुद्धी चउविहा वुत्ता पञ्चमा नोपलम्भयि॥
औत्पत्तिकी वैनयिकी कर्मजा पारिणामिकी।
बुद्धिश्चतुर्विधा उक्ता पञ्चमी नोपलभ्यते॥ १॥
पुव्वमदिट्ठमसुयमवेइयतक्खणविसुद्धगहियत्था।

[1] नन्दिसूत्रम्. प. 268—334; 1880, Calcutta.

अव्वाहयफलजोगा बुद्धी ओप्पत्तिया नाम ॥

पूर्वमदृष्टमश्रुतमवेदिततत्क्षणविशुद्धगृहीतार्था ।
अव्याहतफलयोगा बुद्धिरौत्पत्तिकी नाम ॥ २ ॥

भरहसिल पणियरुक्खे खुड्डगपडसरडकायउच्चारे ।
गय घयण गोलत्तम्भे खुल्लगमग्गित्थिपयि पुत्ते ॥ ३ ॥

1 2 3 4 5 6 7 8
भरतशिलापणितवृक्षे खुड्डुग पटसरट काक उच्चारे ।
9 10 11 12 13 14 15 16 17
गज घयण गोलस्तंभे क्षुल्लकमार्गस्त्रीपतिपुत्रे ॥

महुसित्थमुद्दियंके य नाणये भिक्खुचेडगनिहाणे ।
सिक्खाअ अत्थसत्थे इच्छाय महं सेयसहस्से ॥ ४ ॥

18 19 20 21 22 23
मधुसिक्थमुद्रिकाङ्क च नाणके भिक्षु चेटकनिधाने ।
24 25 26 27
शिक्षायामर्थशास्त्रे इच्छा महती शतसहस्रे ॥ ४ ॥

भरनित्थरणसमत्था तिवग्गसूत्तत्थ गहियपेयाला ।
उभये लोगे फलवयी विणयसमुत्था हवयि बुद्धी ॥ ५ ॥

भरनिस्तरणसमर्था त्रिवर्गसूत्रार्थगृहीतप्रमाणा ।
उभये लोके फलवती विनयसमुत्था भवति बुद्धिः ॥ ५ ॥

निमित्ते अत्थसत्थे लेहे गणिये य कूव अस्से य ।
गद्दह लक्खणगंठी अगये गणियाय रहियो य ॥ ६ ॥

28 29 30 31 32 33
निमित्ते अर्थशास्त्रे लखे गणिते च कूपे अश्वे च ।
34 35 36 37 38 39
गर्दभलक्षणग्रन्थी अगदे गणिका च रथिकश्च ॥ ६ ॥

सीया साडी दीहं च तणं अवसव्वयं च कूंचस्स ।
निव्वोदयेय गोणे घोडगपडणं च रुक्खायो ॥ ७ ॥

शीता [40] शाटी दीर्घं च [41] तृणं अपसव्यं च [42] क्रौञ्चस्य ।
[43] निर्वेदनं [44] गवोः [45] घोटकपतनं च [46] वृक्षाञ्च ॥ ७ ॥

उवयोगदिट्ठसारा कम्मपसंगपरिघोलणविसाला ।
साहुक्कारफलवयी कम्मसमुत्था हवयि बुद्धी ॥ ८ ॥

उपयोगदृष्टसारा कर्मप्रसङ्गपरिघोलनविशाला ।
साधुकारफलवती कर्मसमुत्था भवति बुद्धिः ॥ ८ ॥

हेरण्णये करिसये कोलियडोवेयमुत्तिघयपवये ।
तुन्नाय वड्ढयि पूयीयेय घडचित्तकारेय ॥

[47] हैरण्यक [48] कर्षके [49] कौलिक [50] दर्वी [51] घृत [52] प्लवके ।
[53] तुन्नाग [54] वर्धकि [55] आपूपिक [56] घट [57] चित्रकाराञ्च ॥ ९ ॥

अणुमानहेतुदिट्ठंतसाहियावय विवागपरिणामा ।
हियनिस्सेयसफलवयी बुद्धी परिणामियानाम ॥ १० ॥

अनुमानहेतुदृष्टान्तसाधिता वयोविपाकपरिणामा ।
हितनिश्श्रेयसफलवती बुद्धिः पारिणामिकीनाम ॥

अभये सेट्ठीकुमारे देवी उदियोदयो हवयिराया ।
साहुयनन्दिसेणे धणदत्ते सावग अमच्चे ॥

खपये अमच्चपुत्ते चाणक्के चेव्वथूलभद्दे अ ।
नासिक्कसुन्दरीनन्दे वयिरे परिणामिया बुद्धी ॥

चलणाहण आ मण्डे माणिय सप्पये खग्गितूभये ।
परिणामिया बुद्धीये एवमायी उदाहरणा ॥ १२ ॥

[58] अभय [59] श्रेष्ठी [60] कुमारः [61] देवी [62] उदितोदयो भवति राजा ।

साधुश्च नन्दिषेणो[63] धनदत्त[64]श्श्रावको[65]ऽमात्यः[66] ।
क्षपको[67]ऽमात्यपुत्र[68]श्चाणक्य[69]श्चैव स्थूलभद्र[70]श्च ॥
नासिक्यसुन्दरी[71]नन्दो[72] वज्रो[73] पारिणामिकी बुद्धिः ।
चरणाहते[74] आमलके[75] मणौ[76] सर्पे[77] खड्गि[78]स्तूपे[79] च ॥
पारिणामिकया बुद्ध्या एवमादीनि उदाहरणानि ॥

अत्र हि राजनीत्यां व्यापृतानां राज्ञां मन्त्रिणां कारणिकानां पौराणां च यदौत्पत्तिकं वैनयिकं कर्मजं पारिणामिकं वा बुद्धिकौशल्यं कौटिल्यात्पुरैव कथासु प्रख्यापितमासीत् एकोनाशीतिसङ्ख्याकास्ताः कथाः उपर्यनूदितासु गाथासु अङ्काङ्कितैः पदैस्सूचिता वर्तन्ते। कथाश्चैता नन्दिसूत्रव्याख्यायां संक्षेपेण कथिताः सविस्तारमन्येषु जैनग्रन्थेषु रक्षितास्सन्तीत्यस्माद्व्याख्यानादेवावगम्यते । कौटिलीयार्थशास्त्रे पञ्चमाधिकरणे पञ्चमाध्याये दीर्घतृणशीतशाट्यादीनां नीत्युपयुक्तकथासूचकपदानां प्रयोगात् एताः कथाः क्रिस्तात्पूर्वमब्दानां पञ्चमे षष्ठे वा शतके प्रचारं गतास्समासन्निति बाढं ज्ञायते । एतत्कथास्थानीयाः बौद्धजातककथा अपि तदैव बाढं प्रथितास्समभवन्निति भूलनाम्ना पाश्चात्यविदुषा कृतायास्सम्भावनाया इदमपरं निरस्तसन्देहं गमकं भवति । एकोनाशीतिकथानामत्र सङ्ग्रहो ग्रन्थगौरवावह इति शीतशाट्यादिपदसूचितार्थबोधकं कथामात्रमेवात्र सङ्गृहीतम्—

"कश्चित्पुरे कोपि राजा । तत्पुत्राः केनाप्याचार्येण शिक्षयितुमारब्धाः । ते च तस्मै आचार्याय प्रभूतं द्रव्यं दत्तवन्तः । राजा च, द्रव्यलोभी तं मारयितुमैच्छत् । तैश्च पुत्रैः कथंचिदेतत् ज्ञात्वा चिन्तितम्—"अस्माकमेष विद्यादायी परमार्थतः पिता । ततः कथमप्येनमापदो निस्तारयामः" इति । ततो यदा भोजनाय समागतः आ-

चार्यः स्नानशाटिकां याचते तदा ते कुमाराः शुष्कायामपि सत्यां शाट्यां "अहो शीता शाटी" इत्यवदन्। द्वारसंमुखं च तृणं कृत्वा, "अहो दीर्घतृणं" इति, "पूर्वं क्रौञ्चेन सदैव प्रदक्षिणीकृतम्। सम्प्रति तु सोऽपसव्यं भ्रमति" इति चावदन्। ततः आचार्येण ज्ञातं—'सर्वं मयि विरक्तम्। केवलमेते कुमारा मयि भक्तिवशात्तमर्थं ज्ञापयन्ति' इति। ततो यथा न लक्ष्यते तथा स पलायामास"। इति—

एतत्कथानुसारेण "तृणमिति दीर्घश्चारायणः" (V. 5) इत्यत्र "तृणमतिदीर्घं चारायण." इति पाठः पठनीयो भवति। एवमेव उच्चैरसिञ्चनहस्तिप्रत्युञ्छणरथाश्वशब्दा अपि राजकोपप्रसादसूचककथाबोधका इति स्पष्टमवगम्यते। "प्रतिवरणे शूनमति पिशुनपुत्रः। अर्थमानावक्षेपे च परित्यागः" इत्यत्र "प्रतिवरणे अर्थमानावक्षेपे च परित्याग इति पिशुनपुत्रः" इति पाठो गरीयानिति भाति। प्रतिवरणे इत्यस्य प्रतिमन्त्रवरणे अन्यमन्त्रिनियोगे इत्यर्थः।

राजकोपप्रसादप्रदर्शकहस्तिकथा चेत्थं श्रूयते—

मुमूर्षुः कश्चन हस्ती राज्ञा ग्रामे प्रेषितः। 'हस्ती मृत इति न निवेदनीयः। प्रत्युत प्रतिदिनमपि तस्य वार्ता कथनीया' इति ग्रामाय संदेशं च स प्राहिणोत्। रक्षितोऽपि हस्ती मृतः। ग्रामेण राज्ञे निवेदितं च—"देवाद्य हस्ती न निषीदति, नोत्तिष्ठति, न कबलं गृह्णाति, नापि नीहारं करोति, न वोच्छ्वासनिश्वासौ विदधाति, किं बहुना न स सचेतनचेष्टां करोति" इति। राज्ञा भणितं—'किं, रे, मृतो हस्ती'? इति। ततो ग्रामेण भणितं 'देव, देवपादा एवं ब्रुवते। न वयम्' इति। तदा राजा मौनमादधौ। गतो ग्रामलोकः"। इत्येका हस्तिकथा.

"बुद्धिकुशलं मन्त्रिणमेकमन्विष्यन् कश्चन राजा हस्तिनमालानस्तम्भे बन्धयित्वा घोषणमचीकरत् 'योऽमुं हस्तिनं तोलयति

तस्मै राजा महतीं वृत्तिं प्रयच्छति' इति। कश्चन पुरुषः हस्तिनं महासरसि नावमारोप्य, यावत्प्रमाणा नौः जलनिमग्ना तावत्प्रमाणां रेखां कृत्वा, ततो हस्तिनं समुत्तार्य गण्डशैलंकल्पान् ग्राव्णः नावि पूर्वरेखानिमज्जनपर्यन्तं प्रक्षिप्य, तान्पाषाणान् तोलयामास। गजतोलनं च राज्ञे निवेदितवान्। राजा च तुष्टस्तं मन्त्रिणं चकार" इत्यपरा कथा.

"परचक्रेण रुद्धः कश्चन राजा जलदूषणार्थं विषमपेक्षमाणो वैद्यानाकारयामास। कश्चन वैद्यो यवमात्रं विषमानीय 'देव, गृहाण विषं' इति समर्पितवान्। राजा स्तोकं विषं दृष्ट्वा चुकोप। तस्मै वैद्यो विज्ञापयामास—'देव, सहस्रवेधीदं विषम्। तस्मादप्रसादं मा कुरु' इति। राजाऽवादीत् 'कथमेतदवसेयम्' इति। स आह—"आनीयतां कोऽपि जीर्णो हस्ती' इति। आनीतस्य हस्तिनः वाल-प्रदेशे रन्ध्रं कृत्वा विषं तत्र सञ्चरितं वैद्येन। ततो भणितं च तेन—'देव, सर्वोऽप्येष हस्ती विषमयो जातः। योऽप्येनं भक्षयति सोऽपि विषमयो भवति। एवमेतद्विषं सहस्रवेधि" इति। ततो हस्तिहानिदूनचेतसं राजानं तोषयितुं वैद्यो रन्ध्रे तस्मिन्नपरं गदं संचार्य विषप्रतीकारं कृत्वा हस्तिनमुज्जीवयामास" इति.

एवमेव रथाश्वकथा अपि बुद्धिकौशलप्रदर्शिकाः कथिताः दृश्यन्ते। तास्तत एवावगन्तव्याः।

कोशान्तरालाभावाद्यथास्थितपाठमेव प्रथममुद्रणं साधितम्। इतः परं मद्रासपत्तनस्थप्राच्यकोशभाण्डागाराय संपादितस्य कोशद्वयस्य प्रत्यन्तरमासाद्य, जर्मनीदेशस्थे उर्जबर्गपत्तने सर्वविद्यालयकोशागारे स्थितस्य कोशस्य च तृतीयचतुर्थाधिकरणयोरुपलभ्यमानान्पाठभेदान्पत्रिकाद्वाराऽऽसाद्य च द्वितीयमुद्रणमिदं बह्वपेक्षितं सपाठभेदं यथामति परिष्कृतं च संसाधितम्। मद्रासजर्मनीकोशौ चात्र मुद्रिते

कोशे 'म' 'ज' अक्षराभ्यां सूचितौ। कचिल्लेखकप्रमादान्नष्टानि छन्दांसि पुनराबद्धानि [1]। कचिच्च ग्रन्थपातस्समुद्धृतः [2]। कोशान्तरापेक्षया परिष्करणीयाः पाठा भूयांसस्स्युरित्येतेनैव संभाव्यते।

भट्टस्वामिकृता प्रतिपदपञ्चिकानाम्नी व्याख्या द्वितीयाधिकरणाष्टमाध्यायादारभ्याधिकरणसमाप्तेरुपलब्धा वर्तत इति पुरैव सूचितम्। इदानीं मद्रासपत्तनस्थप्राच्यकोशागाराय सम्पादितायाः सप्तमाधिकरणसप्तमाध्यायादा च द्वादशाधिकरणचतुर्थाध्यायादुपलब्धायाः वादिकविचूडामणिमहोपाध्यायश्रीमाधवयज्वमिश्रविरचिताया नयचन्द्रिकाख्यायाः अर्थशास्त्रव्याख्यायाः प्रत्यन्तरमासादितम्। द्वितीयाधिकरणसप्तमाध्यायादारभ्य द्वादशाधिकरणचतुर्थाध्यायपर्यन्तं विद्यमाने मूले १५०० ग्रन्थपरिमितेऽपि व्याख्येयं ४००० ग्रन्थपरिमिता दृश्यत इति विस्तृतैवेयं समीचीनेत्यपि भाति. अथापि सम्पूर्णव्याख्यानोपलब्धिं विना नेयं मुद्रणार्हेत्येष एव खेदावहो विषयः।

चाणक्यसूत्राणीति प्रसिद्धानि एकसप्तत्यधिकपञ्चशतमितानि नीतिबोधकानि सूत्राणि कचिदर्थशास्त्रवाक्यसमानाकाराणीति प्रायेण चाणक्यकृतान्येवेति ग्रन्थान्तेऽत्रानुबन्धे मुद्रितानि। "स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च" इति ग्रन्थान्ते यानि सूत्राणि कौटिल्येन परामृष्टानि न तान्येतानि चाणक्यसूत्राणि यतोऽर्थशास्त्रं नैतेषां भाष्यम्। परं तु यथा ममार्थशास्त्राङ्गलेयभाषानुवादस्य उपोद्घाते मयोहितं तथैव नयचन्द्रिकाकारेणापि 'प्रकरणाधिकरणसमुद्देशः' इत्युपक्रम्य "तन्त्रयुक्तयः" इत्यन्तं प्रतिप्रकरणविषयसूचनारीत्या कौटिल्येन पठितान्येव वाक्यकदम्बानि अर्थशास्त्रात्मकभाष्यविषयीभूतानि सूत्राणीति स्पष्टीकृतमिति सर्वमनवद्यम्.

R. SHAMA SASTRY.

[1] II. 24 ; [2] IV. 1, 3.

तृतीयमुद्रणस्योपोद्घातः.

तृतीयमुद्रणमिदमर्थशास्त्रस्य न द्वितीयमुद्रणादतीव भिद्यत इति नोपोद्घातान्तरमपेक्षते । तथाऽपि महामहोपाध्यायेन गणपतिशास्त्रिणा स्वीयव्याख्यया साकमनन्तशयनसंस्कृतग्रन्थावल्यां प्रकाशितस्यार्थशास्त्रप्रथमाधिकरणद्वयस्योपोद्घाते महीशूरराजकीयसंस्कृतग्रन्थावल्यां प्रकाशितमर्थशास्त्रमूलं पाठाशुद्धिभूयिष्ठं तदीयाङ्ग्लेय भाषानुवादश्चासङ्गतार्थ इति यत्प्रलपितं, यच्च स्वप्रकाशितं मूलं व्याख्यानं च बाढं शुद्धं सङ्गतं चेति प्रोद्घुष्टं तदत्र किंचिद्विचार्यते । असूयान्धीकृतदृशाऽनेनशास्त्रिणा दृष्टा पाठाशुद्धिः पूर्ववाक्ययोज्यस्य पदस्योत्तरवाक्येन सह योजनमुत्तरवाक्ययोज्यस्य पूर्ववाक्येन सह योजनमित्येवञ्जातीयेत्यवर्णि । सोऽयं पदानां स्थानव्यत्ययोऽधः प्रदर्शितेषु अष्टसु स्थलेषु कृतो दृश्यते—

[1] पृष्ठे	पङ्क्तौ
31	9–10
,,	16–17
40	7–8
46	5–6
52	8–9
55	2–3
94	9–10
116	21
117	1

एतेषु सर्वेषु प्रदेशेषु पदानां स्थानव्यत्ययेन न काऽप्यर्थान्तरपरिस्फूर्तिर्दृश्यते । यत्पुनः 145 तमपृष्ठे तृतीयपङ्क्त्यां "पाद"

[1] पृष्ठसंख्या पङ्क्तिसंख्या चात्र महीशूरपुरमुद्रितमर्थशास्त्रम् परामृशति.

पञ्चघटीनाम्" इति विभज्य वाक्यान्तरं कृत्वा "सार्धद्वादशघटिकात-ऊर्ध्वं सार्धसप्तदशघटिकातः प्राक् याः पञ्चघटिकास्तासां संबन्धिन्यग्निकार्यकरणे पादः पणचतुर्भागदण्डः" इति तेन व्याख्यातं तदसमञ्जसम्। न हि पञ्चघटिकाः सार्धद्वादश सार्धसप्तदशमध्यवर्तिन्यएव ग्राह्या इत्यत्र गमकं वर्तते। मध्यमयोरह्नश्चतुर्भागयोरिति पूर्ववाक्ये यच्चतुर्भागद्वयमुक्तं तत्राग्नयप्रतीकारेऽष्टभागो दण्डो विहित इति न तदस्य पाददण्डस्य विषयः। तस्मिन्नप्यस्य विषये सति एकस्यापराधस्य विरुद्धदण्डद्वयविधानापत्तिः—किंचाह्नश्चतुर्भागयोरिति पूर्ववाक्य इवात्रापि घटिकास्विति सप्तम्यन्तं विहाय घटीनामिति षष्ठ्यन्तप्रयोगे कारणं मृग्यम्। किं च घटीशब्दोऽत्र ग्रन्थे न कुत्रापि नालिकार्थे प्रयुक्तो दृश्यते। यत्पुनः द्वितीयाधिकरणे एकाविंशतितमेऽध्याये घटिकास्थाने स्थानमिति वाक्यं दृश्यते तत्र घटिकास्थानशब्दश्शुल्कगृहे कंचित्प्रदेशं वाऽभिधत्ते इति भट्टस्वामिनाऽन्यथा व्याख्यातम्—किं चात्रसंबन्धिपदं न निर्दिष्टम् 'अग्निकार्यकरणे' इत्यध्याहारे न किमपि गमकम्। किंचात्र व्याख्याने गणपतिशास्त्रिणा "अग्निकार्य" शब्दोऽनेकवारं प्रयुक्तो दृश्यते। अग्निकार्यशब्दोऽग्न्युपासनमभिधत्ते न तु लौकिकमग्न्युद्दीपनमिति नाद्यापि तेन ज्ञातमिति विस्मयावहमेतत्—

किंच पादः पणचतुर्भागदण्ड इति प्रतिपदोपन्यासः गणपतिशास्त्रिणः प्रमाद एव। न हि पादशब्दो दण्डमण्यामिधत्ते।

अपि च मर्यादाशब्दस्य तात्पर्यार्थे पुरस्कारमुपादाय कृतमाङ्ग्लेयभाषानुवादमधिक्षिपन् गणपतिशास्त्री स्वीये पदप्रयोगे पदशक्यार्थमपि न गणयतीति विस्मयावहमेतत्। किंच द्राविडकर्णाटादिभाषासु अनुल्लङ्घनीयसीमास्थानीयपुरस्कारार्थे प्रयुज्यमानः मर्यादाशब्दः संस्कृतभाषाया एव संगृहीत इति न कोऽपि सन्देग्धि।

तदित्थं पदव्यत्ययेन वाक्ययोजनां कृत्वा गणपतिशास्त्रिणा महाननर्थस्संपादितः, व्याख्याने तावत्कलितानानर्थान् किञ्चित्पश्यामः—

असत्प्रग्रहः अपूज्यपूजनामिति शास्त्रिणा व्याख्यातम्. (पृ. 16 प. 14) नैतादृशार्थकल्पने किमपि प्रमाणं वर्तते. नाप्यर्थोपधाप्रकरणे ईदृशार्थस्य साङ्गत्यं दृश्यते.

कुलं बहुपुत्रसङ्घः इति व्याख्यातम्. (पृ. 35 प. 8) बहुभ्रातृसङ्घो बहुदारसङ्घोवाऽन्योवा किं न स्यात् ?

प्रवासयेत् हन्यादित्यर्थः इति व्याख्यातम्. (पृ. 37 प 2) प्रमाणं तु नानूदितम्—

परिहारः दौस्स्थ्यपरिहारेण स्वास्थ्यसिध्यर्थं दीयमानं द्रव्यमिति परिहारशब्दार्थः परिष्कृतः (पृ. 47 प. 6) नात्र किमपि प्रमाणमनूदितम्–प्रत्युत परिहारशब्दः प्राचीनशासनेषु करविसर्गे एवार्थे प्रयुक्तो दृश्यते. अत्रापि ग्रन्थे पाञ्चवार्षिकः चातुर्वार्षिकः परिहार इति 170 तमे पृष्ठे 2–5 पङ्क्तिषु करविसर्गरूपार्थे एव प्रयुक्तो दृश्यते.

बाहिरिकान् कितववञ्चकनटनर्तकान् इति व्याचक्षाणस्य (पृ. 57 प. 5) शास्त्रिणः प्रमाणं स्वोक्तिरेवेति कः प्रत्येति ?

लक्षणाध्यक्षः क्षेत्रारामादिसीमाचिह्नाध्यक्षः इति (पृ. 60 प. 1) व्याख्यानं 84 तमे पृष्ठे तृतीयपङ्क्त्यां लक्षणाध्यक्षः टङ्कशालाध्यक्ष इति स्वोक्त्यैव विसंवदति.

व्याजी विंशतिभाग इति व्याख्यातम्. (पृ. 60, प. 14) पञ्चकं शतं व्याजीत्यस्य (पृ. 84 प. 9) किमर्थं त्यागः ?

तत्रैव "परिघः आतरद्रव्यम्" इति व्याख्याने 85 तमपृष्ठे द्वितीयपङ्क्त्यां "परिघः पारीक्षिकम्" इति व्याख्यानेन विरुद्धम्.

राजवर्षं मासः पक्षो दिवसश्च व्युष्टं राजवर्षादि चतुष्टयं व्युष्टसंज्ञामित्यर्थः इति (पृ. 60, प. 20) व्याख्यातम्—नेयं संज्ञा, लोकप्रसिद्धा प्रयोगाभावात्; परंतु ग्रन्थकृतस्स्वसंज्ञा शास्त्रे व्यवहारार्थं कृता—इति वक्तव्यम्. यदीदमित्थं स्यात् तर्हि संज्ञाप्रदेशाः "व्युष्टदेशकालेति

64 तमे पृष्ठे दृश्यमानाः 16, 17, 19 पंक्तय एव. तत्र च व्युष्टशब्देन साकं कालशब्दस्यापि प्रयोगदर्शनात् राजवर्षमासपक्षदिवसदेशकालेति कालवाचकयोरन्यतरस्य वैयर्थ्यं स्यात्. ततश्च व्युष्टशब्दस्यात्र न राजवर्षादिरर्थः परत्वन्य एवार्थ इत्यभ्युपगन्तव्यम्. श्रावणकृष्णप्रतिपदि तदानीमारब्धो वर्षादिर्व्युष्टमिति पौर्णमास्यन्तो मासस्तदानीमासीदित्यन्यत्र विस्तरः— आषाढीं गाणनिक्यान्यागच्छेयुः इति गाणनिक्यागमनानन्तरं वत्सरादौ श्रावणकृष्णप्रतिपदि गाणनिक्यपरीक्षोपक्रमस्तदानीमासीदिति विद्वांसो विदांकुर्वन्तु.

60 तमे पुटे 20 पङ्क्तौ—

वर्षाहेमन्तग्रीष्माणां तृतीयसप्तमा दिवसोनाः पक्षाः शेषाः पूर्णाः। पृथगाधिमासक इत्यत्र शास्त्रिणा राजवर्षस्य त्रिधा विभक्तस्य सिंहादिवृश्चिकान्ता रविमासा वर्षर्तुः, धनुरादिमीनान्ता हेमन्तः, मेषादिकुलीरान्ता ग्रीष्म इति त्रयाणामेषामृतूनां प्रत्येकमष्टौ पक्षाः। तेषु तृतीये सप्तमे चैकैको दिवसो हीयते, पृथगधिमासकः सौरमासाच्चान्द्रमासोऽतिरिक्तः इति व्याख्यातम्. इयं व्याख्या चाणक्यकालिकज्योतिषसिद्धान्तग्रन्थकर्त्रभिप्रायोभयाज्ञानविजृम्भितैव ॥

आ वराहमिहिरकालात् अद्ययावत् सौरसंवत्सरो हि सपादषष्ट्यधिकत्रिशतदिवसात्मकः गृहीतोऽस्ति, तत्र षट्सु दिनेषु न्यूनितेषु एकोनषष्ट्यधिकत्रिशतदिवसाश्शिष्यन्ते। किमेतावता प्राप्तम्? किं वाऽनेन दिवससमुदायेनात्रोपपादनीयं वर्तते? किमीदृगुक्तेः प्रयोजनम्? सेयं तु कल्पनैव। किं च अधिमासकः अतिरिक्तश्चान्द्रमास इति कथमयमर्थस्समुपलभ्यते? ग्रन्थकृतस्त्वयमाशयः—

कालमानाध्यायान्तिमश्लोकोक्तरीत्या "त्रिशतं चतुःपञ्चाशाश्चाहोरात्राणामिति" गाणनिक्याधिकाराध्यायोक्तरीत्या च षट्षष्ट्यधिकशतत्रयदिवसात्मकस्सौरस्संवत्सरः चतुःपंचाशदधिकत्रिशतदिवसा-

त्मकश्चान्द्र इति ग्रन्थकृदभिप्रेतौ संवत्सरौ । पञ्चदशाहोरात्रः पक्षः इति कालमानोक्तरीत्या 24 × 15 = 360 दिवसात्मकः चान्द्रसंवत्सरो मा भूदिति चतुर्विंशतिपक्षेषु तृतीये सप्तमे एकादशे पञ्चदशे एकोनविंशे त्रयोविंशे च पक्षे एकैकदिवसत्यागात् षड्दिवसाः न्यूनीकृताः । तथा च354 दिवसात्मकश्चान्द्रस्सिद्ध्यति। 366 दिवसात्मकात्सौराद्द्वादशदिनैर्न्यूनश्चान्द्रः सार्धसंवत्सरद्वये एकमधिमासं करोतीति.

व्युष्टदेशकालेत्यपदिवाक्यानां व्युष्टादिविवरणयुक्तामायगणनां स म्पादयेदित्यर्थ इति विवरणं (पृ. 64, प. 16,17, 19) केवलं शब्दाडम्बर एव । किं च समानयेदित्यस्य सम्पादयेदितिनार्थः.

युक्तप्रतिषेधः अध्यक्षाणां धनापहाराद्वारणमितिव्याख्यातम्.— (पृ. 65, प. 15) किं धनापहारः अध्यक्षैः राजसमक्षमेव क्रियते येन राजा तांस्तस्माद्वारयेत् ? " ज्ञातुं न शक्या धनमाददानाः " इति ग्रन्थकृतैवोक्तम् । अत इदं व्याख्यानमसङ्गतमेव । ग्रन्थकृदाशयस्तु युक्तानामभितानां प्रतिषेधः विसर्गः, अनियोगो वा इति ।

उपयुक्तः युक्तानामुपरिनियुक्तः इति गणपतिशास्त्रिणा कृता व्याख्या (पृ. 67 प. 8)युक्तः प्रधानः उपयुक्तः तत्सहकारीति स्वकृतया व्याख्यया (पृ. 59, प. 4) विसंवादिनीति समाकालनीयम् ।

तदेवं सत्यामपि सव्याख्यात्रयमातृकासामग्र्यामेतैरन्यैश्च बहुभिर्दोषैः परिपूर्णा गणपतिशास्त्रिणः कृतिरित्येतद्विस्मयावहम्। असत्यामप्येतादृशसामग्रीसम्पत्त्यामेकमातृकानिबन्धने महीशूरग्रन्थावल्यां प्रकाशितेऽर्थशास्त्रग्रन्थे तस्याङ्ग्लेयभाषानुवादे च प्राज्ञेनाप्यवार्याः केचिद्दोषास्सम्भवेयुरित्येतदस्माकं भूषणं न तु दूषणमित्यलम् ॥

PREFACE TO THE THIRD EDITION.

THIS edition of the Arthasastra undertaken to meet the ever growing demand of the public for copies of the work differs in no way from its predecessors and stands therefore in need of no new introduction of any kind. Still the publication of the first two books of the work with a commentary of his own and with an introduction specifying the reasons for undertaking a new edition by Mahamahopadhyaya T. Ganapati Sastri in the Trivandrum Sanskrit Series cannot be passed over without a few remarks on the worth of his performance. The one reason urged by him for undertaking a new edition of his own is that the Mysore edition "abounded with errors, such as the word of a previous sentence joined to a subsequent sentence and *vice versa* . . . . The nature of the subjects dealt with is such that even a talented Pandit cannot hope to easily understand it. What then will be the condition, if it contains errors too?"

The reply to this question can be easily found in the misinterpretation which the talented Pandit made not only in his attempt at recasting a few sentences here and there in the text, but also in introducing anachronisms in interpreting ancient words.

For example on page 145, line 3* he has split into two sentences what in the Mysore edition is taken to be a single sentence. Taking "पादः पथघर्टानां" as a separate

* These references are to the Mysore Oriental Library Edition.

sentence he explains it saying that kindling of fire during the five *ghatikas* from 12½ to 17½ *ghatikas* of the day shall be punished with a fine of one-fourth of a pana. The use of ghati in the sense ghatika, 24 minutes, is found nowhere else in the Arthasastra. The word ghatikâsthâna in Book II, Ch. 21 can be explained otherwise, as done by Bhattasvami by taking it to mean a room in the toll-house. As a fine of one-eighth of a pana is levied for kindling fire during the midday in the previous sentence, this additional fine is not merely superfluous but also contradictory. It follows therefore that the Mahamahopadhyaya's interpretation here is quite wrong and that his splitting the sentence into two is indefensible. Another serious objection to this interpretation is the violation of grammar. The use of the word *panchaghati* in the possessive case instead of in the locative as in the case of 'अह्श्चतुर्भागयोः in the previous sentence is against such interpretation. While Mr. T. Ganapati Sastri is ready to find fault with the free English translation or paraphrase of the Arthasastra without strict adherence to the literary sense of words such as Maryada on p. 13. line 1, he himself does not seem to be free from carelessness in giving exact equivalents while commenting on the words of the Arthasastra. For example in commenting upon the word पाद on page 145 line 3 he gives पणचतुर्भागदंड as synonymous with it. Even an ordinary student of Sanskrit knows that पाद never means a danda, but only a quarter. Here it means only a quarter of a pana. He also uses अग्निकार्य in the sense of kindling of fire, though it is a technical word meaning a ceremonial kindling of fire.

Fortunately for Mr. T. Ganapati Sastri the other instances of his re-arrangement of sentences have not in-

volved him into absurdities. There is hardly any change in the meaning due to taking up a word or two with the previous or subsequent sentence. The following are a few instances of his re-arrangement:—

P. 31, lines 9-10 and 16-17; P. 40, lines 7-8;
P. 46, lines 5-6; P. 52, lines 8-9; P. 55, lines 2-3;
P. 94, lines 9-10; P. 116, line 21 and P. 117 line 1.

How hollow then is the excuse of erroneous reading urged by him for his undertaking what he presumes to be correct edition!

Turning to his commentary, one is obliged to say that his commentary is as wrong as his recasting of sentences in all those places where he departed from the English rendering of the work. To take only a few examples:—

On page 16, line 14, he takes the word असत्प्रग्रह to mean अपूज्यपूजन. Neither does असत् mean अपूज्य nor प्रग्रह पूजन.

On page 35, line 8, his interpretation of the word कुल as बहुपुत्रसङ्घ is wrong.

On page 37. line 2, he takes प्रवासयेत् in the sense of हन्यात् should kill, without quoting any authority for it.

On page 47, line 6. परिहार: दौस्स्थ्यपरिहारेण स्वास्थ्यसिद्धयर्थं दीयमानं द्रव्यम्. This is quite wrong. Compare पांचवार्षिक: परिहार: etc. p. 170 lines 2-5.

On page 57, line 5, वाहिरिकान् कितववञ्चक नटनर्तकान्. Authority is not quoted.

On page 60 line 1, लक्षणाध्यक्ष: क्षेत्रारामादिसीमाविभागाध्यक्ष· This is wrong. Compare p. 84, line 3.

On page 60, line 14, व्याजी विंशतिभाग:. This restriction to twentieth part is wrong. It means 5 per cent and 7 per cent commissions also.

On page 60, line 14, परिघः आतरद्रव्यम् meaning ferry due. Again on page 85, line 2, the same word is taken by him to mean पारीक्षिकम् coin-testing charge, thus contradicting himself.

On page 60, line 20, राजवर्षं मासः पक्षो दिवसश्च व्युष्टम्—राजवर्षादि चतुष्टयं व्युष्टसंज्ञमित्यर्थः Authority is not quoted. If however Vyushta is taken to mean the four things, royal year, month, fortnight, and day, then the use of the word काल along with Vyushta on page 64 lines 16, 17, and 19 will be meaningless.

On page 60, line 21, वर्षहेमन्तग्रीष्माणां तृतीयसप्तमाश्चिवसोनाः पक्षाः शेषाः पूर्णाः इति राजवर्षस्य त्रिधा विभक्तस्य सिंहकन्यातुलावृश्चिकाश्चत्वारो रविमासा वर्षर्तुरित्येको भागः. Here Mr. T. Ganapati Sastri takes the year to be a solar year of 365¼ days made up of 12 Sankramana months divided into 3 seasons, and in the 24 fortnights of this year 6 days are in his opinion to be omitted. This results in a year of 359 days. What year is this? Nothing can be more absurd than this. (See the English Translation and the note here).

Page 64, lines 15, 16, 17 व्युष्टादिविवरणयुक्तां आयगणनां संपादयेदित्यर्थः This means that he should secure the accounts of receipts containing the explanations of Vyushta and other words. Can there be anything more nonsensical than this?

Page 65 line 15. युक्तप्रतिषेधः युक्तानामध्यक्षाणां धनापहाराद्वारणम्. This is far-fetched. Where is the impliance of Dhanapahara?

P. 67, line 8, उपयुक्तः युक्तानामुपरिनियुक्तः one who is appointed above the Yuktas. This is contradictory to the meaning of the same word given by him on page 59, line 4. There he says—युक्तः प्रधानः उपयुक्तः तत्सहकारी.

Another serious defect of his edition is the omission of all various readings.

Whether in the face of these and other errors too numerous to point out here it is fair for the Mahamahopadhyaya to find fault with the Mysore Edition of the text and its English version, is a question that is left to scholars for decision.

R. S.

विषयानुक्रमणिका.

		पत्रम्
I.	विनयाधिकारिकम्—	1—45
	राजवृत्तिर्नाम प्रकरणाधिकरणसमुद्देशः	1—6
	विद्यासमुद्देशः, आन्वीक्षिकीस्थापना, त्रयीस्थापना, वार्तास्थापना, दण्डनीतिस्थापना	6—9
	वृद्धसंयोगः	10—11
	इन्द्रियजयः, अरिषड्वर्गत्यागः राजर्षिवृत्तम्	11—13
	अमात्योत्पत्तिः	13—14
	मन्त्रिपुरोहितोत्पत्तिः	15—16
	उपधाभिश्शौचाशौचज्ञानममात्यानाम्	16—18
	गूढपुरुषोत्पत्तिः, संस्थोत्पत्तिः	18—19
	गूढपुरुषप्रणिधिः, संचारोत्पत्तिः	20—22
	स्वविषये कृत्याकृत्यपक्षरक्षणम्	22—24
	परविषये कृत्याकृत्यपक्षोपग्रहः	24—26
	मन्त्राधिकारः	26—29
	दूतप्रणिधिः	30—32
	राजपुत्ररक्षणम्	32—35
	अवरुद्धवृत्तम्	35—36
	अवरुद्धे वृत्तिः	36—37
	राजप्रणिधिः	37—39
	निशान्तप्रणिधिः	40—42
	आत्मरक्षितकम्	42—45
II.	अध्यक्षप्रचारः—	45-147
	जनपदनिवेशः	45—49
	भूमिच्छिद्रविधानम्	49—50
	दुर्गविधानम्	51—54
	दुर्गनिवेशः	54—57
	सन्निधातृचेयकर्म	57—59

	पत्रम्
समाहर्तृसमुदयप्रस्थापनम्	59—62
अक्षपटले गाणनिक्याधिकारः	62—65
समुदयस्य युक्तापहृतस्य प्रत्यायनम्	65—67
उपयुक्तपरीक्षा	68—70
शासनाधिकारः	70—75
कोशप्रवेश्यरत्नपरीक्षा	75—81
आकरकर्मान्तप्रवर्तनम्	81—85
अक्षशालायां सुवर्णाध्यक्षः	85—89
विशिखायां सौवर्णिकप्रचारः	89—93
कोष्ठागाराध्यक्षः	93—97
पण्याध्यक्षः	97—99
कुप्याध्यक्षः	99–101
आयुधागाराध्यक्षः	101–102
तुलामानपौतवम्	103–105
देशकालमानम्	106–109
शुल्काध्यक्षः, शुल्कव्यवहारः	109–113
सूत्राध्यक्षः	113–115
सीताध्यक्षः	115–118
सुराऽध्यक्षः	119–121
सूनाध्यक्षः	122–123
गणिकाध्यक्षः	123–125
नावध्यक्षः	126–128
गोऽध्यक्षः	128–131
अश्वाध्यक्षः	132–135
हस्त्यध्यक्षः, हस्तिप्रचारः	135–139
रथाध्यक्षः, पत्त्यध्यक्षः, सेनापतिप्रचारः	139–140
मुद्राऽध्यक्षः, विवीताध्यक्षः	140–141
समाहर्तृप्रचारः, गृहपतिवैदेहकतापसव्यञ्जनाः, प्रणिधयश्च	141–143
नागरकप्रणिधिः	143–147

		पत्रम्
III.	धर्मस्थीयम्—	147—200
	व्यवहारस्थापना, विवादपदनिबन्धः	 147-151
	विवाहसंयुक्तम्, विवाहधर्मः, स्त्रीधनकल्पः आधिवेदनिकम्, शुश्रूषा, भर्म, पारुष्यम्, द्वेषः, अतिचारः, उपकारः, व्यवहारप्रतिषेधः, निष्पतनं, पथ्यनुसरणं, ह्रस्वप्रवासः, दीर्घप्रवासः ...	 151-159
	दायविभागः, दायक्रमः, अंशविभागः, पुत्रविभागः	 160-165
	वास्तुकम्, गृहवास्तुकम्, वास्तुविक्रयः, सीमाविवादः, मर्यादास्थापनम्, बाधाबाधिकम्, विवीतक्षेत्रपथहिंसा	 166-173
	समयस्यानपाकर्म	 173
	ऋणादानम्	 174-177
	औपनिधिकम्	 177-181
	दासकर्मकरकल्पः, स्वाम्यधिकारः, भृतकाधिकारः	 181-184
	संभूयसमुत्थानम्	... 184-187
	विक्रीतक्रीतानुशयः	 187-188
	दत्तस्यानपाकर्म	 189
	अस्वामिविक्रयः, स्वस्वामिसम्बन्धः ...	 189-191
	साहसम्	 191-193
	वाक्पारुष्यम्	 193-194
	दण्डपारुष्यम्	 194-197
	द्यूतसमाह्वयम्, प्रकीर्णकानि	 197-200
IV.	कण्टकशोधनम्—	200—237
	कारुकरक्षणम्	 200-204
	वैदेहकरक्षणम्	 204-207
	उपनिपातप्रतीकारः	 207-210
	गूढाजीविनां रक्षा	 210-212
	सिद्धव्यञ्जनैर्माणवप्रकाशनम्	 212-214
	शङ्कारूपकर्माभिग्रहः	 214-217
	आशुमृतकपरीक्षा	 217-219

पत्रम्

वाक्यकर्मानुयोगः 220–222
सर्वाधिकरणरक्षणम् 222–226
एकाङ्गवधनिष्क्रयः 226–228
शुद्धश्चित्रश्च दण्डकल्पः 228–230
कन्याप्रकर्म 230–233
अतिचारदण्डः 233–237

V. योगवृत्तम्— 237—257
दाण्डकर्मिकम् 237-242
कोशाभिसंहरणम् 242–246
भृत्यभरणीयम् 247–249
अनुजीविवृत्तम् 250–251
समयाचारिकम् 252–253
राज्यप्रतिसन्धानम् एकैश्वर्यम् 254–257

VI. मण्डलयोनिः— 257—262
प्रकृतिसंपदः 257–259
शमव्यायामिकम् 259–262

VII. षाड्गुण्यम्— 263—321
षाड्गुण्यसमुद्देशः, क्षयस्थानवृद्धिनिश्चयः 263–266
संश्रयवृत्तिः 267–268
समहीनज्यायसां गुणाभिनिवेशः, हीनसन्धिः 268–271
विगृह्यासनम् , सन्धायासनम् , विगृह्य यानम् , सन्धाय
यानम्, सम्भूय प्रयाणम् 272–274
यातव्यामित्रयोरभिग्रहचिन्ता क्षयलोभविरागहेतवः प्रकृतीनां
सामवायिकविपरिमर्शः 274–278
संहितप्रयाणिकम् परिपणितापरिपणितापसृताश्च स-
न्धयः 279–283
द्वैधीभाविकास्सान्धिविक्रमाः 283–286
यातव्यवृत्तिः अनुग्राह्यमित्रविशेषाः 286–288

		पत्रम्
	मित्रसन्धिः, हिरण्यसन्धिः, भूमिसन्धिः, अनवसितसन्धिः, कर्मसन्धिः	 289–301
	पार्ष्णिग्राहचिन्ता	 301–305
	हीनशक्तिपूरणम्	 305–307
	बलवता विगृह्योपरोधहेतवः, दण्डोपनतवृत्तम्	 308–310
	दण्डोपनायिवृत्तम्	 311–313
	सन्धिकर्म, सन्धिमोक्षः	 313–317
	मध्यमचरितम्, उदासीनचरितम्, मण्डलचरितम्	... 317–321
VIII.	व्यसनाधिकारिकम्—	321—338
	प्रकृतिव्यसनवर्गः	 321–325
	राजराज्ययोर्व्यसनचिन्ता	 325–327
	पुरुषव्यसनवर्गः	 327–330
	पीडनवर्गः, स्तम्भवर्गः, कोशसङ्गवर्गः	 331–335
	बलव्यसनवर्गः, मित्रव्यसनवर्गः	 335–338
IX.	अभियास्यत्कर्म—	339—363
	शक्तिदेशकालबलाबलज्ञानम्, यात्राकालाः	 339–342
	बलोपादानकालाः, सन्नाहगुणाः, प्रतिबलकर्म	 342–345
	पश्चात्कोपचिन्ता, बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारः	 346–349
	क्षयव्ययलाभविपरिमर्शः	 349–351
	बाह्याभ्यन्तराश्चापदः	 352–353
	दूष्यशत्रुसंयुक्ताः	 354–357
	अर्थानर्थसंशययुक्ताः तासामुपायविकल्पजास्सिद्धयः	 358–363
X.	साङ्ग्रामिकम्—	363–377
	स्कन्धावारनिवेशः	 363–364
	स्कन्धावारप्रयाणम्, बलव्यसनावस्कन्दकालरक्षणम्	 364–366
	कूटयुद्धविकल्पाः, स्वसैन्योत्साहनम्, स्वबलान्यबलव्यायोगः	 366–369
	युद्धभूमयः, पत्त्यश्वरथहस्तिकर्माणि	 369–371

पत्रम्

पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः, सारफल्गुबल विभागः, पत्त्यश्वरथहस्तियुद्धानि 372–375
दण्डभोगमण्डलासंहतव्यूहनम्, तस्य प्रतिव्यूहस्थापनम् 375–377

XI. सङ्घवृत्तम्— 378—381
भेदोपादानानि, उपांशुदण्डः 378–381

XII. आबलीयसम्— 382—394
दूतकर्माणि 382–383
मन्त्रयुद्धम् 384–386
सेनामुख्यवधः, मण्डलप्रोत्साहनम् 386–388
शस्त्राग्निरसप्रणिधयः, वीवधासारप्रसारवधः 388–391
योगातिसन्धानम्, दण्डातिसन्धानम्, एकविजयः 391–394

XIII. दुर्गलम्भोपायः— 394—419
उपजापः 394–396
योगवामनम् 396–400
अपसर्पप्रणिधिः 400–403
पर्युपासनकर्म, अवमर्दः 404–408
लब्धप्रशमनम् 408–410

XIV. औपनिषदिकम्— 410—426
परघातप्रयोगः 410–414
प्रलम्भनम्, अद्भुतोत्पादनम् 414–418
भैषज्यमन्त्रप्रयोगः 418–425
स्वबलोपघातप्रतीकारः 425–426

XV. तन्त्रयुक्तिः— 426–431
तन्त्रयुक्तयः 426–43

XVI. चाणक्यसूत्राणि— 432—456
शुद्धाशुद्धम्— 457

शुद्धाशुद्धम्.

पुटे	पङ्क्तौ	अशुद्धम्	शुद्धम्
31	10	भतु	भर्तु
32	9	१६	१३
177	5	बालिश्यात्	बालिश्याद्वा
253	9	नारायणः	चारायणः
305	7	१८	११८
,,	15	हीता	हीना
389	9	मध्यं	मद्यं
399	6	नात्मनि	नात्मनि
415	1	गर्द भस्य	गर्दभस्य
419	पाठान्तरे	शलका	शलाका
423	2	द्धटनं	द्धाटनं
,,	,,	स्वापन	स्वापनं